# Brahmaproktam Shivarchanopadesham 1

# બ્રહ્માપ્રોક્તં શિવાર્ચનોપદેશમ્ ૧

## Document Information

Text title : Brahmaproktam Shivarchanopadesham 1

File name : shivArchanopadesham1brahmAproktaM.itx

Category : shiva, shivarahasya, upadesha, advice

Location : doc_shiva

Transliterated by : Ruma Dewan

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | ugrAkhyaH saptamAMshaH | adhyAyaH 15 | 71-92||

Latest update : April 28, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

April 28, 2024

*sanskritdocuments.org*

# બ્રહ્માપ્રોક્તં શિવાર્ચનોપદેશમ્ ૧

કુર્વન્તુ દેવદેવસ્ય મહાદેવસ્ય શૂલિનઃ ।
સ્મરણં પૂજનં ભક્ત્યા ભયનિર્ણોદનાય વઃ ॥ ૭૧॥

શઙ્કરાર્ચનશીલાનાં શિવૈકરતચેતસામ્ ।
ભયલેશોઽપિ નાસ્ત્યેવ ભયદોઽપિ સ ભીતિહા ॥ ૭૨॥

ગૌરીકાન્તો યદા ચિત્તે શઙ્કરઃ પરિવર્તતે ।
તદા ભયાનિ યાન્ત્યેવ દૂરતઃ શિવશાસનાત્ ॥ ૭૩॥

લાભઃ પ્રતિપદં તેષાં તેષાં પ્રતિપદં જયઃ ।
યેષાં ચેતસિ કુન્દેદુધવલઃ પાર્વતીપતિઃ ॥ ૭૪॥

તેષાં પુત્રાશ્ચ પૌત્રાશ્ચ વેદશાસ્ત્રવિશારદાઃ ।
યેષાં ચેતસિ કુન્દેન્દુધવલઃ પાર્વતીપતિઃ ॥ ૭૫॥

તેષામારોગ્યમૈશ્વર્યં તેષામૌદાર્યમુત્કટમ્ ।
યેષાં ચેતસિ કુન્દેદુધવલઃ પાર્વતીપતિઃ ॥ ૭૬॥

સમ્પદોઽનુદિનં તેષાં તેષાં કલ્યાણમન્વહમ્ ।
યેષાં ચેતસિ કુન્દેદુધવલઃ પાર્વતીપતિઃ ॥ ૭૭॥

તેષાં ભાગ્યાનિ પુણ્યાનિ તેષાં શ્રેયાંસિ ચાન્વહમ્ ।
યેષાં ચેતસિ કુન્દેદુધવલઃ પાર્વતીપતિઃ ॥ ૭૮॥

તેષાં દ્વારિ મદોન્મત્તમાતઙ્ગોત્તમકોટયઃ ।
યેષાં ચેતસિ કુન્દેદુધવલઃ પાર્વતીપતિઃ ॥ ૭૯॥

તેષાં ગૃહેષુ કુણ્ડોધ્નો ગાવઃ ક્ષીરામૃતાશયાઃ ।
યેષાં ચેતસિ કુન્દેદુધવલઃ પાર્વતીપતિઃ ॥ ૮૦॥

તેષાં કરસ્થિતઃ સ્વર્ગો નાનાયજ્ઞફલઃ શિવઃ ।
યેષાં ચેતસિ કુન્દેદુધવલઃ પાર્વતીપતિઃ ॥ ૮૧॥

તેષાં હસ્તગતો મોક્ષઃ પુનરાવૃત્તિવર્જિતઃ ।
યેષાં ચેતસિ કુન્દેન્દુધવલઃ પાર્વતીપતિઃ ॥ ૮૨॥

ભાગ્યં શઙ્કરભક્તાનામમેયમમલં ધ્રુવમ ।
યેષાં વયમપીન્દ્રાદ્યાઃ સેવકા નાત્ર સંશયઃ ॥ ૮૩॥

ધન્યાઃ શઙ્કરપાદાબ્જધ્યાનમાત્રપરા નરાઃ ।
યેષાં વયમપીન્દ્રાદ્યાઃ સેવકા નાત્ર સંશયઃ ॥ ૮૪॥

ધન્યાસ્તે શિવલિઙ્ગાર્ચાસક્તાન્તઃકરણા નરાઃ ।
યેષાં વયમપીન્દ્રાદ્યાઃ સેવકા નાત્ર સંશયઃ ॥ ૮૫॥

ધન્યાસ્તે શિવપૂજાર્થમુપાત્તદ્રવિણા નરાઃ ।
યેષાં વયમપીન્દ્રાદ્યાઃ સેવકા નાત્ર સંશયઃ ॥ ૮૬॥

ધન્યાસ્તે મન્ત્રપૂતાશ્ચ ભસ્મભાલા નરોત્તમાઃ ।
યેષાં વયમપીન્દ્રાદ્યાઃ સેવકા નાત્ર સંશયઃ ॥ ૮૭॥

ધન્યાસ્તે કણ્ઠસંસક્તરુદ્રાક્ષાભરણા નરાઃ ।
યેષાં વયમપીન્દ્રાદ્યાઃ સેવકા નાત્ર સંશયઃ ॥ ૮૮॥

ધન્યાસ્તે શિવનામૈકજીવનાઃ શિવપૂજકાઃ ।
યેષાં વયમપીન્દ્રાદ્યાઃ સેવકા નાત્ર સંશયઃ ॥ ૮૯॥

ધન્યાસ્તે શિવનામાઙ્કકથાશ્રવણતત્પરાઃ ।
યેષાં વયમપીન્દ્રાદ્યાઃ સેવકા નાત્ર સંશયઃ ॥ ૯૦॥

ધન્યાસ્તે શિવનામાઙ્ગાનાસક્તાત્મચેતસઃ ।
યેષાં વયમપીન્દ્રાદ્યાઃ સેવકા નાત્ર સંશયઃ ॥ ૯૧॥

ધન્યાસ્તે શિવભક્તેભ્યો દત્તવિત્તા નરોત્તમાઃ ।
યેષાં વયમપીન્દ્રાદ્યાઃ સેવકા નાત્ર સંશયઃ ॥ ૯૨॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે બ્રહ્માપ્રોક્તં શિવાર્ચનોપદેશં ૧ સમ્પૂર્ણમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ ઉગ્રાખ્યઃ સપ્તમાંશઃ । અધ્યાયઃ ૧૫ । ૭૧-૯૨ ॥

- .. shrIshivarahasyam ugrAkhyaH saptamAMshaH . adhyAyaH 15 . 71-92 ..

Notes:

Upon being approached by distressed Deva-s દેવાઃ, Brahmā બ્રહ્મા gives Upadeśa ઉપદેશ to them about worshipping Pārvatipati Śiva પાર્વતિપતિ શિવ.

Encoded and proofread by Ruma Dewan

*Brahmaproktam Shivarchanopadesham 1*

pdf was typeset on April 28, 2024

Please send corrections to *sanskrit@cheerful.com*